# ॥ वैयाकरणसिद्धान्तकौमुदी ॥

## अच्सन्धिप्रकरणम् (५)

२७.०८.२०१०

# पुनरावर्तनम्

- वान्तो यि प्रत्यये
- गव्यूतिः
- धातोस्तन्निमित्तस्यैव

# ६५. क्षय्यजय्यौ शक्यार्थे (६.१.८१)

- यान्तादेशनिपातनार्थमिदम् ।
- क्षेतुं शक्यं क्षय्यम् ।
- क्षि क्षये
- क्षि यत् (शकि लिङ् च – ३.३.१७२)
- क्षि य (हलन्त्यम् – १.३.३, तस्य लोपः – १.३.९)
- क्षे य ('सार्वधातुकार्धधातुकयोः' ७.३.८४ – इति गुणः)
- क्षय् य (अयादेशविधायकसूत्रं नास्ति – 'क्षय्यजय्यौ शक्यार्थे' इति सूत्रेण निपात्यते)
- क्षय्यम्

- जेतुं शक्यं जय्यम्
- जि जये
- जि यत् (शकि लिङ् च – ३.३.१७२)
- जि य (हलन्त्यम् – १.३.३, तस्य लोपः – १.३.९)
- जे य ('सार्वधातुकार्धधातुकयोः' ७.३.८४ – इति गुणः)
- जय् य (अयादेशविधायकसूत्रं नास्ति – 'क्षय्यजय्यौ शक्यार्थे' इति सूत्रेण निपात्यते)
- जय्यम्

- शक्यार्थे किम् – क्षेतुं योग्यं क्षेयम् (पापम्)
- क्षि क्षये
- क्षि यत् (अर्हे कृत्यतृचश्च – ३.३.१६९)
- क्षि य (हलन्त्यम् – १.३.३, तस्य लोपः – १.३.९)
- क्षे य ('सार्वधातुकार्धधातुकयोः' ७.३.८४ – इति गुणः)

- जेतुं योग्यं जेयम् (मनः)
- जि जये
- जि यत् (अर्हे कृत्यतृचश्च – ३.३.१६९)
- जि य (हलन्त्यम् – १.३.३, तस्य लोपः – १.३.९)
- जे य ('सार्वधातुकार्धधातुकयोः' ७.३.८४ – इति गुणः)
- जेयम्

# ६६. क्रय्यस्तदर्थे (६.१.८२)

- तस्मै प्रकृत्यर्थाय इदं तदर्थम् ।
- क्रेतारः क्रीणीयुरिति बुद्ध्या आपणे प्रसारितं क्रय्यम् ।
- क्रेयमन्यत् । क्रयणार्हमित्यर्थः ।

# ६७. लोपः शाकल्यस्य (८.३.१९)

- पदद्वयम् ।
- ’भोभगोअघोअपूर्वस्य योऽशि’ (८.३.१७) इत्यतः ’अपूर्वस्य’ इति, ’अशि’ इति च अनुवर्तते ।
- ’व्योर्लघुप्रयत्नतरः शाकटायनस्य’ (८.३.१८) इत्यतः व्योः इति अनुवर्तते ।
- ’पदस्य’ (८.१.१६) इत्यधिक्रियते ।
- अपूर्वस्य इति व्योः इत्यस्य विशेषणम् । वचनविपरिणामः ।

- अपूर्वयोः व्योः – षष्ठी = अवर्णपूर्वयोः यकार-वकारयोः स्थाने
- अशि – सप्तमे = अशि परे
- लोपः – प्रथमा = विधेयः = लोपः स्यात्
- शाकल्यस्य – तन्नामकस्य आचार्यस्य मते । अर्थात्, विकल्पः ।
- अवर्णपूर्वयोः पदान्तयोः यवयोः वा लोपः अशि परे ।

हरे एहि

| | | | | |
|---|---|---|---|---|
| हर् | ए | | ए | हि |
| | एच् | | अच् | |
| हर् | अय् | | ए | हि |
| | | पदम् | | |
| हर् | अ | य् | ए | हि |
| | अवर्णः | पदान्ते यकारः | अश् | |
| हर् | अ | | ए | हि |

☙ पूर्वत्रासिद्धम् इति लोपशास्त्रस्य असिद्धत्वात् न स्वरसन्धिः ।

☙ हरे+ एहि – हरय् एहि - हर एहि / हरयेहि

☙ विष्णो+इह – विष्णव् इह - विष्ण इह / विष्णविह

☙ श्रियै उद्यतः – श्रियाय् उद्यतः - श्रिया उद्यतः / श्रियायुद्यतः

☙ गुरौ उत्कः – गुराव् उत्कः - गुरा उत्कः / गुरावुत्कः

- कानि सन्ति
- कानि अस् अन्ति (लट् लकारे प्रथमपुरुषे बहुवचनम्)
- कानि स् अन्ति ('श्नसोरल्लोपः' ६.४.१११ – इति सार्वधातुके क्ङिति प्रत्यये परे अस्-धातोः अकारस्य लोपः)
- कानि अ स् अन्ति ('अचः परस्मिन् पूर्वविधौ' १.१.५६ इति स्थानिवद्भावः –
- परनिमित्तः = प्रत्ययनिमित्तः, अजादेशः = अचः अकारस्य लोपरूपः आदेशः, स्थानिभूतादचः = अकारात् पूर्वत्वेन दृष्टस्य = इकारस्य, कार्ये कर्तव्ये = यणादेशे कर्तव्ये

- कौ स्तः
- कौ अस् तः (लट्लकारे प्रथमपुरुषे द्विवचनम् )
- कौ स् तः ('श्नसोरल्लोपः' ६.४.१११ – इति सार्वधातुके क्ङिति प्रत्यये परे अस्-धातोः अकारस्य लोपः)
- कौ अ स् तः ('अचः परस्मिन् पूर्वविधौ' १.१.५६ इति स्थानिवद्भावः –
- परनिमित्तः = प्रत्ययनिमित्तः, अजादेशः = अचः अकारस्य लोपरूपः आदेशः, स्थानिभूतादचः = अकारात्, पूर्वत्वेन दृष्टस्य = औकारस्य, कार्ये कर्तव्ये = आवादेशे कर्तव्ये

’कानि सन्ति’ ’कौ स्तः’ इत्यत्र अस्तेः अल्लोपस्य स्थानिवद्भावेन यण्-आवादेशौ प्राप्तौ ’न पदान्त’ इति सूत्रेण पदान्तविधौ तन्निषेधात् न स्तः ।

# ६८.एकः पूर्वपरयोः (६.१.८४)

- इत्यधिकृत्य ।
- अधिकारसूत्रम् ।'ऋत उत्' (६.१.१११) पर्यन्तम् ।
- पूर्ववर्ण-परवर्णयोः उभयोः स्थाने एकः आदेशः भवति । अयमेव एकादेशः।

# ६९. आद्गुणः (६.१.८७)

- पदद्वयम् । आद्, गुणः ।
- 'इको यणचि' इत्यतः अचि इति अनुवर्तते ।
- आद् – पञ्चमी = अवर्णात्
- अचि – सप्तमे = अचि परे
- गुणः – प्रथमा = विधेयः = अकार-एकार-ओकारेषु अन्यतमः
- एकः पूर्वपरयोः = एकादेशः स्यात्
- अवर्णादचि परे पूर्वपरयोः एको गुणः आदेशः स्यात् संहितायाम् ।

उप + इन्द्रः

उप्  अ  इ  न्द्रः

अवर्णः  अच्

उप्  ए  न्द्रः

स्थानेऽन्तरतमः

स्थानी – अकारः (कण्ठः), इकारः (तालु)

आदेशः – अकारः (कण्ठः), एकारः (कण्ठतालु), ओकारः (कण्ठोष्ठम्)

- रमा+ईशः
- रम् आ ई शः
- रम् ए शः
- रमेशः

- गङ्गा+ उदकम्
- गङ्ग् आ उ दकम्
- गङ्ग् ओ दकम्
- गङ्गोदकम्

- कृष्ण + ऋद्धिः
- कृष्ण् अ ऋ द्धिः

  ???

- स्थानी – अकारः (कण्ठः), ऋकारः (मूर्धा)
- आदेशः – अकारः (कण्ठः), एकारः (कण्ठतालु), ओकारः (कण्ठोष्ठम्)

# ७०. उरण् रपरः (१.१.५१)

- पदत्रयम् । उः, अण्, रपरः ।
- उः = ऋकारस्य (पितृ – पितुः, तद्वत् ऋ – उः ) – षष्ठी = ऋकारस्य स्थाने
- रपरः – रप्रत्याहारः = रेफपरः, लकारपरो वा ।
- ऋ इति त्रिंशतः संज्ञा इत्युक्तम् (ऋलृवर्णयोः मिथः सावर्ण्यं वाच्यम् । ऋ – १८ + लृ – १२), तत्स्थाने यः अण् सः रपरः सन्नेव प्रवर्तते ।
- तत्रान्तरतम्यात् 'कृष्णर्द्धिः' इत्यत्र अर् । 'तवल्कारः' इत्यत्र 'अल्' ।

- कृष्ण + ऋद्धिः -
- कृष्ण् अ ऋ द्धिः - ???
- स्थानी – अकारः (कण्ठः), ऋकारः (मूर्धा)
- आदेशः – अर् (कण्ठः+मूर्धा), एकारः (कण्ठतालु), ओकारः (कण्ठोष्ठम्)
- कृष्ण् अर् द्धिः
- कृष्णर्द्धिः

- तव+ऌकारः
- तव् अ ऌ कारः
- स्थानी – अकारः (कण्ठः), ऌकारः (दन्ताः)
- आदेशः – अल् (कण्ठः+दन्ताः), एकारः (कण्ठतालु), ओकारः (कण्ठोष्ठम्)
- तव् अल् कारः
- तवल्कारः

कृष्णर्द्धिः

| | | | | | |
|---|---|---|---|---|---|
| कृष्ण् | | अ | र् | द् | धिः |
| | अच् | रेफ | यर् | | |
| कृष्ण् | अ | र् | द् द् | धिः ('अचो रहाभ्यां द्वे' इति वा द्वित्वम्) | |

कृष्णर्द्धिः – कृष्णर्द्धिः

# ७१. झरो झरि सवर्णे (८.४.६५)

- पदत्रयम् ।
- 'हलो यमां यमि लोपः' इत्यतः हलः इति, लोपः इति च अनुवर्तते । 'झयो होऽन्यतरस्याम्' इत्यतः अन्यतरस्याम् इत्यनुवर्तते च ।
- हलः – पञ्चमी = हल्-वर्णात् परस्य
- झरः – षष्ठी = झर्-वर्णस्य स्थाने
- सवर्णे झरि – सप्तमी – सवर्णसंज्ञके झर्-वर्णे परे
- लोपः – प्रथमा = विधेयः = लोपः स्यात् ।
- हलः परस्य झरः लोपो वा स्यात् सवर्णे झरि ।

कृष्ण र् द् ध् इः

हल् झर् सवर्णः झर्

कृष्ण र् ध् इ

कृष्णर्धिः

कृष्ण र् द् द् धिः

हल् झर् सवर्णः झर्

कृष्ण र् द् धिः

कृष्णर्द्धिः

- द्वित्वाभावे लोपे सति एकधम् (कृष्णार्धिः)
- असति लोपे, द्वित्वलोपयोर्वा द्विधम् (कृष्णार्द्धिः)
- सति द्वित्वे लोपे चासति त्रिधम् (कृष्णार्द्द्धिः)

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| | तवल्कारः | | | | तवल्कारः | | | |
| तव | ऌ | क् | आरः | तव् | अ | ऌ | क् | आरः |
| | यण् | मय् | | | अच् | यर् | न अच् | |
| तव | ऌ | क् क् | आरः | तव् | अ | ऌ ऌ | क् | आरः |
| (यणो मयो द्वे वाच्ये) | | | | (अनचि च) | | | | |